Name-25/01/2018
Roll No----------------

# DELHI PUBLIC SCHOOL, VINDHYANAGAR
## PRE BOARD 2017-18

**Subject- sanskrit**
**ciass - x**
**Time- 3 hours !** **Maximum Marks: 80**

निर्देशाः-

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

खण्डः (क) अपठित-अवबोधनम् - 10 अंकाः

खण्डः (ख) रचनात्मकं कार्यम् - 15 अंकाः

खण्डः (ग) अनुप्रयुक्त - व्याकरणम् - 25 अंकाः

खण्डः (घ) पठित - अवबोधनम् - 30 अंकाः

(ii) सर्वे प्रश्नाः अनिवार्याः ।

(III) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रश्नसंख्या अवश्यं लेखनीया ।

(VI) उत्तराणि संस्कृतेन एव लेखनीयानि ।

### खण्डः 'क'

### अपठित-अवबोधनम् (10 अंकाः)

1. अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत- 10

मानवीय-जीवने बलस्य अतिमहत्त्वपूर्णं स्थानं वर्तते । बलं विना न कश्चित् किमपि कर्तुं प्रभवति । तद् बलं द्विविधम्-शारीरिकं बौद्धिकं च । शारीरिकं बलं मनुष्यं स्वस्थं वीरं च रचयति । स्वस्थो हि जनः स्वकर्तव्यस्य पालने समर्थो भवति । स्वस्थः पुरुषः परेषां रक्षां कर्तुं क्षमो भवति । शारीरिकबलात् बुद्धिबलम् श्रेयस्करम् । बुद्धिबलेन एव चाणक्यः विशालम् अपि नन्दसाम्राज्यं धरातलं नीतवान् । महात्मा गान्धी शारीरिक दृष्ट्या अति-दुर्बलः आसीत् , परन्तु तस्य बुद्धिबलम् विचित्रम् आसीत् । आंग्लशासकानाम् अतुला सैन्य-शक्तिः तस्य प्रगतिं प्रतिरोद्धुं न प्राभवत् ।

1.एकपदेन उत्तरत । 1/2X4=2

(I) मानव-जीवने कस्य अतिमहत्त्वपूर्णं स्थानं वर्तते ?

(ii) कं विना कश्चित् किमपि कर्तुं न शक्यते ?

(iii) महात्मागान्धी कया अति दुर्बलः आसीत् ?

(iv) शारीरिकं बलं कम् स्वस्थं च रचयति ?

2. पूर्णवाक्येन उत्तरत- 2x2=4

(i) कीद्वशः पुरुषः परेषां रक्षां कर्तुं क्षमो भवति ?

(ii) कस्मात् बुद्धिबलम् श्रेयस्करम् ?

3. निर्देशानुसारेण उत्तरत- 1x2=2

(i) सैन्यशक्तिः - अत्र किम् विशेषणम् ?

(अ) बलम्, (आ) शक्तिः, (इ) अतुला, (ई) प्रगतिम्

(ii) ' तस्य बुद्धिबलम् विचित्रम् आसीत् ' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) चाणक्याय, (आ) गान्धिने, (इ) स्वास्थ्याय, (ई) शरीरम्

(iii) 'प्राभवत्' इति क्रियापदस्य कर्तापदम् किम् ?

(अ) कश्चित्, (आ) पुरुषः, (इ) स्वस्थ, (ई) सैन्यशक्तिः

(iv) 'अक्षमः' अस्य किम् विलोम पदम् अत्र प्रयुक्तं ?

(अ) रक्षाम् , (आ) क्षमः, (इ) क्षमाशील, (ई) क्षमसु

4 अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत । .2

**खण्ड 'ख'**

**रचनात्मकं - कार्यम् (15अंकाः)**

**2.भवान् रमेशः । भवता पितरं प्रति पत्रे रिक्तस्थानानि मंजूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत ।** 5

**मंजूषा** - प्रथमं, परिश्रमस्य, दिल्लीनगरात्, पितृमहोदयः,वार्षिकपरीक्षायै, पठामि, प्रियविषयम्, गणितस्य, अध्ययलम्, रमेशः

यमुनाछात्रावासः

-----1-------

तिथिः---------

पूज्य----2-------

सादरं नमोनमः

भवतः पत्रं प्राप्तम् । भवान् ज्ञातुम् इच्छति यत्----3-----मम सज्जा कीद्वशी वर्तते ? अद्यत्वे अहम् समयस्य नियोजनं कृत्वा ----4------, मम दिनचर्या तु निश्चिता । प्रतिदिनम् एकहोरायावत् प्रत्येकं विषयस्य-----5-----करोमि । -----6-----विषये तु मम सज्जापूर्णा एव । आंग्लविषये----7----आवश्यकता अस्ति । संस्कृतम् तु मम-----8------। अत्र न कापि चिन्ता । आशासे परिश्रमेण अवश्यमेव ----9---स्थानं लप्स्ये । मातृचरणेषु मम प्रणामाः ।

भवताम् प्रियः पुत्रः

-----10-----

3. अधोदत्तं चित्रं द्रष्ट्वा मजूषायाम् प्रदत्तशब्दानां सहायतया पंचवाक्यानि लिखत ।10



मञ्जूषा

राष्ट्रमण्डलस्य क्रीडानां प्रतीकः शेरा, अनेके क्रीडकाः, प्रसन्नाः, सन्ति, विजयचिह्नम्, पुष्पमालाः धारयन्ति, विजयोत्साहयुक्ताः, हर्षिताः, दृश्यन्ते, चित्रं कारयन्ति

अथवा

"अनुशासनम्" इति विषयमधिकृत्य मंजूषां प्रदत्तशब्दानां सहायतया पंचवाक्यानि लिखत।

मंजूषा- अनुशासनम्, अस्माकं,छात्राः,वास्तविकः,अर्थः,आदेशपालनम्,खलु,आचार्याणाम्,बाल्यकालात्, शासनस्य,भवेत्

खण्डः'ग'

अनुप्रयुक्तव्याकरणम् (25अंकाः)

4. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत । 4

(i) तदैव ते विहस्य अवदन् ।

(अ) ते+एव (ब) तत्+एव (स) तदा+एव (द) तदे+एव

(ii) नूनन्ते दानवीराः सौभाग्यशालिनः ।

(अ) नूनं +ते (ब) नून+ते (स) नुनं+ते (द) नूनः+ते

(iii) मनो दुः+निग्रहं चलम् ।

(अ) दुनिग्रहं (ब) दुर्निग्रहं (स) दुःनिग्रहं(द) दुंनिग्रहं

(iv) साध्वादेशः अविचारणीयः भवति ।

(अ) साधु+आदेशः (ब) साध्वा+देशः (स) साधुः+आदेशः (द) साध्वादे+शः

5. अधोलिखितवाक्येषु रेखांकितपदानां समासं-विग्रहं वा प्रदत्तविकल्पेभ्य चित्वा लिखत । 4

(i) विषधरः दुष्टबुद्धिं दष्टवान् ।

(अ) दुष्ट बुद्धिं यस्य सः
(ब) दुष्टा बुद्धिः यस्य सः, तम्
(स) दुष्टबुद्धिं यस्मिन् तत्
(द) दुष्टा बुद्धिः यस्याः सा

(ii) <u>यमुनायाः समीपम्</u> दिल्ली अस्ति ।

(अ) यमुनासमीपम्
(ब) उपयमुनम्
(स) प्रतियमुनम्
(द) यमुनातरम्

(iii) <u>श्रीकृष्णार्जुनौ</u> प्राविशतः ।

(अ) श्रीकृष्णः अर्जुनौ च
(ब) श्रीकृष्णम् अर्जुनम् च
(स) श्री कृष्णः च अर्जुनः च
(द) श्रीकृष्णस्य अर्जुनः

(iv) <u>प्रत्येकं</u> पर्वणि समारोहः भवति ।

(अ) प्रति एकम्
(ब) एकम् प्रति
(स) एकेकम्
(द) एकम् एकम् प्रति

**6. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं उत्तरं विकल्पेभ्यः चित्वा वाक्यानि पूरयत-** **4**

(i) तौ मार्गे <u>क्रीड्+शतृ</u> बालकान् प्रेक्ष्य अवदताम् ।

(अ) क्रीडत् (ब) क्रीडतान् (स) क्रीडन्तौ (द) क्रीडन्तः

(ii) विद्यालये <u>नीति+ठक्</u> शिक्षा आवश्यकी ।

(अ) नीतिकी (ब) नैतिकः (स) नैतिकी(द) नैतिकम्

(iii) सदाचारस्य <u>महत्त्वम्</u> को न जानाति ?

(अ) महत्+त्वा (ब) महत+त्वम् (स) महत्+त्व (द) महत्+व

(iv) गायक+टाप् मधुरं गायति।

(अ) गायकाः (ब) गैयका(स) गायिकाः (द) गायिका

**7. अधोलिखिते रिक्तस्थानानि मंजूषायां प्रदत्तैः अव्ययपदैः पूरयित्वाउत्तरपुस्तिकायां लिखत ।** 4

(i) पुत्र ! इदानीं गृहात्-------गत्वा पश्य तत्र कः विद्यते ?

(अ) एव (ब) इव (स) बहिः (द) अपि

(ii) भवत्याः जननी मम जननी---------प्रियवादिनी अस्ति ।

(अ) एव (ब) तत्र (स) इव (द) हि

(iii) -----------पाठकाः न सन्ति तत्र श्रोतारः न सन्ति ।

(अ) यत्र (ब) तत्र (स) सर्वत्र (द) अत्र

(iv) ---------पिता--------पुत्रः

(अ) यावत्-तावत् (ब) यथा-तथा (स) यदा-तदा (द) यदि-तर्हि

**8. अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारेण पूरयत-** **3**

(i) लता - ममते! त्वम् प्रातः उद्याने किं करोषि ?

ममता - लते !-------प्रातः उद्याने पुष्पाणि सिंच्यन्ते ।

(अ) अहम् (आ) मया (इ) माम् (ई) मयि

(ii) लता - किम् त्वम् प्रतिदिनम् पादपान् अपि सिंचसि ?

ममता - आम् ! मया प्रतिदिनम्---------अपि सिंच्यन्ते ।

(अ) पादपः (आ) पादपम् (इ) पादपेन (ई) पादपाः

(iii) लता - शोभनम् ! एतत् तु समीचीनं कार्यं अस्ति।

ममता - त्वया पर्यावरणाय किम्----------?

(अ) क्रियते (आ) करोषि (इ) करोति (ई) कारयति

**9. अधोलिखित अंकानाम् स्थाने समयं संस्कृतपदेषु लिखत -** **1/2x4=2**

**दूरदर्शनस्य समाचाराणां समयसारिणी**

(i) हिन्दी समाचाराः प्रातः (8:30)-----------वादने प्रसार्यन्ते ।

(अ) सार्ध अष्ट (ब) अष्ट (स) सपाद अष्ट (द) पादोन् नव

(ii) संस्कृत समाचाराः प्रातः (10:15)-----------वादने प्रसार्यन्ते ।

(अ) सपाद एकादश (ब) सपाद दश (स) सार्ध दश (द) पादोन् दश

(iii) आंग्लसमाचाराः मध्याह्ने (2:00)----------वादने प्रसारिताः भवन्ति ।

(अ) द्वि (ब) सपादद्वि (स) सार्धद्वि (द) पादोन् द्वि

(iv) उर्दूसमाचाराः सायंकाले(6:45)------------वादने भवन्ति ।

(अ) सार्ध षड् (ब) सपाद षड् (स) सपाद सप्त (द) पादोन् सप्त

**10. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं उत्तरं चित्वा वाक्यं पुनः उत्तरपुस्तिकायां लिखत ।** **4**

(i) तेन सह अहम् अपि <u>गच्छति</u> ।

(ii) <u>सः</u> मम पुस्तिका अस्ति ।

(iii) किम् युवाम् अपि <u>चलिष्यसि</u> ?

(iv) तत्र श्वः अनेके छात्राः पत्रं <u>लिखन्ति</u> ।

**खण्डः 'घ'**

**(पठित-अवबोधनम् (30अंकाः)**

**11. अधोलिखतं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन यच्छत -** 6+6+6=18

(अ) अनेन बालवचसा प्रतिहतान्तकरणः प्रच्छन्नभाग्यः अचिन्तयत्-किम् इदम् वचनं माम् एव लक्ष्यीकरोति ? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा

गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते । अद्य प्रभृति पापपथं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिं अवदत् 'सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान् ।' प्रच्छन्नभाग्यः यु समुजातविवेकः स्व ग्रहं प्रतिनिव्रतः ।

1, एकपदेन उत्तरत । 1x2=2

(i) केन वचसा प्रच्छन्नभाग्यस्य चक्षुषी समुन्मीलिते ?

(ii) कः समुजातविवेकः स्वगृहं प्रतिनिव्रतः ?

2. एकवाक्येन उत्तरत- 2

प्रच्छन्नभाग्यः दुष्टबुद्धिं किम् अवदत् ?

3. निर्देशानुसारेण उत्तरत- 1/2x4=2

(i) गद्यांशे 'अचिन्तयत्' इति क्रियापदस्य किम् कर्तापदम् ?

(अ) दुष्टबुद्धिः (आ) चक्षुषी (इ) क्लेशपरम्परा (ई) प्रच्छन्नभाग्यः

(ii) अस्मिन् अनुच्छेदे 'नेत्रे ' पदस्य कृते किम् पदं प्रयुक्तम् ?

(अ) अक्षि (आ) पन्थानं (इ) चक्षुषी (ई) प्रभृति

(iii)'पुण्यपथम्. इति पदस्य किं विपरीतार्थम् पदम् अत्र प्रयुक्तं ?

(अ) कुमार्गम् (आ) पापपथम् (इ) पन्थानं (ई) परम्पराम्

(iv) साधुजनम् गर्हितं इमम् पन्थानं - अत्र किम् विशेष्यपदम् ?

(अ) साधुजनगर्हितम् (आ) पन्थानं (इ) साधुजन इति (ई) गर्हितम्

(आ) पद्यांशः -

यत् प्रोक्तं येन केनापि तस्य तत्वार्थनिर्णयः ।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥

1. एकपदेन उत्तरत - 1x2=2

(i) गूढार्थस्य निणयः कः कर्तुं शक्यः ?

(ii) जनः केन तत्त्वार्थनिर्णयः कर्तुं शक्नोति ?

2. एकवाक्येन उत्तरत - 2

विवेकः कः भवति ?

3. निर्देशानुसारं उत्तरत - 2

(i) 'स विवेक इतीरितः' अत्र विशेषणपदं किम् ?

(अ) सः (आ) विवेकः (इ) इति (ई) इतीरितः

(ii)अस्मिन् श्लोके 'सारनिर्णयः' पदस्य कः पर्यायः प्रयुक्तः ?

(अ) इतीरितः (आ) तत्त्वार्थनिर्णयः (इ) निर्णयः (ई) तत्त्वार्थः

(इ) नाट्यांशः

काकः -रे परभृत ! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः ?
अतः अहमेव करुणापरः ।

राजहंसः - शान्तम् शान्तम् ! अहमेव नीरक्षीरविवेकी पक्षिणां राजा ।

बकः - धिक् युष्मान् ! अहमेव शिरिमणिः ।

(ततः प्रकृतिमाता प्रविशति )

प्रकृतिः - (सस्नेहम्) अलम् अलम् मिथः कलहेन । अहं प्रकृतिः एव युष्माकं जननी । यूयं सर्वे एव मम प्रियाः । सर्वेषां महत्त्वं विद्यते यथासमयम् । सर्वैः एव मम शोभा । न तावत् कलहेन समयं वृथा यापयेत् । मिलित्वा एव मोदध्वम् जीवनं च रसमयं कुरुध्वम् ।

1 एकपदेन उत्तरत- 1+1=2

(i) पिकस्य संततिं कः पालयति ?

(ii) 'अहमेव नीरक्षीरविवेकी' इति वाक्यं कः कथयति ?

2.एकवाक्येन उत्तरत - 2

प्रकृतिः किम् संदेशं ददाति ?

3.निर्देशानुसारम् उत्तरत - 1/2x4=2

(i) 'यूयं सर्वे एव मम प्रियाः' अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तं ?

(अ) काकाय (आ) राजहंसाय (इ) बकाय (ई) प्रकृत्यै

(ii) 'कोकिला' इति अर्थस्य कृते अत्र किम् पदं प्रयुक्तम् ?

(अ) काकः (आ) राजहंसः (इ) बकः (ई) परभृत

(iii) 'राजहंसः' इति पदस्य किम् विशेषणपदं अत्र प्रयुक्तं ?

(अ) करुणापरः (आ) शिरोमणिः (इ) नीरक्षीरविवेकी (ई) बकः

(iv) 'प्रविशति' क्रियापदस्य कर्तापदम् किम् ?

(अ) राजहंसी (आ) बकः (इ) प्रकृतिमाता (ई) काकः

**12.अधोलिखित-श्लोकयोः अन्वयं मंजूषातः समुचितं पदं चित्वा लिखत-** 1/2x8=4

(क) षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः ।
यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः ॥

अन्वयः -यः----1---द्वादशाक्षस्य चतुर्विंशतिपर्वणः----2-------अर्थम्------3------
सः--------4------कविः (अस्ति)

(ख) कपीनाम् मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

अन्वयः - अश्वानां-----1-----दाहसमुद्भवः-----2------कपीनां----3------नाशम्
अभ्येति यथा-----4------तमः।

मंजूषा

षण्णाभेः , वह्नि , दोषः , मेदसा , सूर्योदयः , परः ,वेद, त्रिषष्टिशतारस्य

**13.अधोलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत -** 1x4=4

(i) मधुरभाषिणी वाणी पुरुषं प्रह्लादयति ।

(ii) अरुणाचले पंचाशदधिकाः नद्यः भवन्ति ।

(iii) वर्षर्तौ हंसः मानसं पलायते ।

(iv) आपदां तरणिः धैर्यम् ।

**14. प्रसंगानुसारम् उचितं अर्थं चिनुत -** 1x4=4

(i) अवसरे यद् दत्तम् अनर्घम् भवति ।

(अ) पर्जन्यः (आ) बहुमूल्यम् (इ) निष्कलंकम् (ई) दानम्

(ii) समन्तात् वर्द्धमानाः अनलशिखाः आकाशं लिहन्ति ।

(अ) वायुगतिः (आ) अनिलज्वालाः (इ) जलपातः (ई) उष्णज्वालाः

(iii) अधिगततत्वः सततं शिष्यहितायोद्यतः गुरुः भवति ।

(अ) अनवरतं (आ) परस्परं (इ) विद्वान् (ई) सकलं

(iv) स सव्येन पाणिना चक्रं ग्रहीतवान् ।

(अ) दक्षिणेन (आ) वामेन (इ) कामेन (ई) हस्तेन